संस्कृत-वार्ता:

15.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- अद्य लोकसभा-निर्वाचनस्य शेषेभ्य: चरणेभ्य: प्रख्यात- राजनीतिकदलै: नैर्वाचनिक-प्रचाराभियानं विधीयते।
- राजस्थानस्य नीमका थाना इत्यस्मिन् जनपदे एकस्मिन् आकरे गतरात्रौ अवरूद्धा: हिन्दुस्तानकॉपर-लिमिटेड इत्याख्यस्य सर्वे पञ्चदश अधिकारिण: अद्य निष्कासिता:।
- विदेशमन्त्री एस्. जयशंकर: प्रोदीरितवान् यत् चाबहार-जलपोत- स्थानकात् सर्वाणि क्षेत्राणि लाभान्वितानि भविष्यन्ति। एतदभिलक्ष्य मनसि संकीर्ण-मानसिकता न भवितव्या।
- सिंगापुरदेशस्य उपनेता लॉरेन्स वोंग: अद्य चतुर्थ-प्रधानमन्त्रिपदाय शपथवचनं स्वीकरिष्यति।
- आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायां राजस्थान रॉयल्स- पंजाब-किंग्स-दलयोर्मध्ये अद्य गुवाहाटीनगररे अद्यात्मकं द्वन्द्वं भविष्यति।

<u>प्रधानमन्त्री-प्रचाराभियानम्</u>

अद्य लोकसभा-निर्वाचनस्य पञ्चमचरणाय षष्ठचरणाय सप्तमचरणाय च राजनीतिकदलै: नैर्वाचनिक-प्रचाराभियानं क्रियते। केन्द्रीयगृहमन्त्री भाजपादलीय: वरिष्ठ: नेता अमितशाह: सबलं प्रत्यपादयत् यत् भारतीय-जनतापार्टीतिदलं पाकाधिकृत-जम्मूकश्मीरस्य प्रत्यावर्तनाय प्रतिबद्धं वर्तते।

पश्चिमबंगालस्य हुगलीस्थले एकां जनसभां सम्बोधयन् श्रीशाह: अकथयत् यत् पाकाधिकृतस्य जना: पाकिस्तानदेशात् स्वतन्त्राय प्रदर्शनानि अभ्यर्थनानि च कुर्वन्त: सन्ति। जम्मूकश्मीरस्य पर्यटन-क्रियाकलाप-संवर्धन-विषयेऽपि गृहमन्त्री कथितवान् यत् द्विकोटि: पर्यटका: जम्मूकश्मीरं प्रत्यागता:। येन कीर्तिमानमपि निर्मितम्। सप्तत्यधिकत्रिशतम् अनुच्छेदस्य निरसन-प्रकरणे श्रीशाह: अवोचत् यत् ममतादीदी- कांग्रेस-इत्यादीनि उक्तवन्त: आसन् यत् अयम् अनुच्छेद: यथावदेव स्थापनीय:। तत्रैव ओडिशानगरे लोकसभा-विधानसभा-निर्वाचने अभिलक्ष्य प्रचाराभियानं तीव्रतां प्राप्नोति। केन्द्रीयगृहमन्त्री अमितशाह: कांग्रेसस्य वरिष्ठो नेता राहुलगांधी अद्य एतस्मिन् राज्ये निजप्रत्याशिभ्य: प्रचाराय जनसभाभ्य: पथप्रदर्शनेभ्यश्च उत्साहिते स्त:।

राजस्थान-अन्वेषणकार्यम्

राजस्थानस्य नीमका थाना इत्यस्मिन् जनपदे एकस्मिन् आकरे गतरात्रौ अवरूद्धाः सर्वे पञ्चदश हिन्दुस्तानकॉपर-लिमिटेड इत्याख्यस्य अधिकारिणः अद्य निष्कासिताः। येषु एकस्य मृत्योः आशंका वर्तते। नीमकाथाना इत्यस्य अधिकारी शरदमेहराः प्रावोचत् यत् निष्कासितानां चतुर्दशजनानाम् उपचारः जयपुरस्य एस्.एम्.एस् चिकित्सालये प्रचलति। अपरतः एको जनः स्वास्थ्य-परीक्षणाय गतः, यतोहि तस्य मृत्योः आशंका अस्ति। एते पञ्चशदशजनाः तदा अवरूद्धाः जाताः यदा आकरे कार्याय रज्जुमार्गारूढा आसन्। तस्मिन्नेव समये भग्नरज्जुमार्गात् ते अधः पतिताः अथ विलुप्ताः आसन्। चिकित्सकीयदलैः प्रचालितस्य अभियानस्य कारणेन एते कर्मिणः बर्हिआगताः।

जयशङ्करः-चाबहार

विदेशमन्त्री एस्. जयशंकरः प्रोदीरितवान् यत् चाबहार-जलपोत-स्थानकेन सर्वाणि क्षेत्राणि लाभान्वितानि भविष्यन्ति। एतदभिलक्ष्य मनसि संकीर्ण-मानसिकता न भवितव्या। ह्यः रात्रौ कोलकातानगरे कार्यक्रममेकं सम्बोधयन् भूतकाले अमरिकादेशः अपि अस्य तथ्यस्य प्रशंसां कृतवान् यत् चाबहार-जलपोतस्थानकस्य व्यापकी प्रासङ्गिकता दरीदृश्यते। अवधेयं वर्तते यत् गतसोमवासरे चाबहार-जलपोतस्थानकस्य संरचित-ईरानदेशीय-जलपोतस्थानकस्य संचालनाय दशवर्षेभ्यः एकस्मिन् अनुबन्धपत्रे हस्ताक्षरः जातः यः नवदिल्ल्यै मध्यएशियया सह व्यापारिक-विस्ताराय साहाय्यं करिष्यति।

इण्डिसंयुति-दलोपवेशनं

उत्तरप्रदेशे लखनऊनगरे अद्य इण्डीसंयुत्याः एकं संयुक्त-सम्मेलनं समनुष्ठितम्। कांग्रेसदलाध्यक्षः मल्लिकार्जुनखरगेः समाजवादीपार्टीतिदलप्रमुखः अखिलेशयादवः अन्ये च सम्बद्ध-दलीयनेतारः अत्रावसरे उपस्थिताः आसन्। कांग्रेस-दलाध्यक्षेण समुल्लिखितं यत् चतुर्विंशत्यधिक-द्विसहस्र-तमवर्षस्य सामान्य-निर्वाचनं लोकतन्त्र-संविधानयोः संरक्षणाय अतिमहत्वपूर्णं वर्तते। श्रीखरगेः समुदीरितवान् यत् शिक्षिताः युवानः वृत्यावभावे सन्ति। समाजवादीपार्टी-प्रमुखेण अखिलेशयादवेनापि निगदितं यत् अस्य इण्डिसंयुति-दलस्येव स्पष्टलक्ष्यं वर्तते यत् यदा सत्तारूढं भविष्यति तदा सर्वाणि सर्वकारीय-रिक्तपदानि पूरितानि भविष्यन्ति अपि च शिक्षितयुवानः वृत्यवसराः प्राप्स्यन्ति।

## भारत-अनिल काले

भारतेन गाज़ा-नगरे संयुक्त-राष्ट्र-संघस्य, सुरक्षा-विभागस्य, सुरक्षा-समन्वय-अधिकारी कर्नल-वैभव-अनिल-काले इत्यस्य निधने दु:खं प्रकटितम्। विदेशमन्त्रालय: अवदत् यत् संयुक्तराष्ट्रे भारतस्य 'स्थायी-अभियानं' तल् अवीव रामल्ला चेत्यादयो: क्षेत्रयो: भारतीयाभियानं च तस्य दिवंगत शरीरस्य स्वेदशं प्रत्यागमनाय सर्वविध-सहायतां कुर्वन्ति। मृतान्वेषणस्य विषये सम्बद्धै: अधिकारिभि: सह निरन्तरं सम्पर्कं कुर्वन्नस्ति। वैभव-अनिल-काले इत्यस्य निधनं सोमवासरे गाज़ा नगरे अभवत्।

## सिंगापुर-नवप्रधानमन्त्री

सिंगापुरदेशस्य उपनेता लॉरेन्स-वोंग: अद्य देशस्य चतुर्थ-प्रधानमन्त्रिपदाय शपथवचनं स्वीकरिष्यति। एकपञ्चाशत्-वर्षीय: अर्थशास्त्री श्रीवोंग: द्विसप्तति वर्षीयस्य ली-सीन-लूंगा इत्येतस्य स्थानं गृहीष्यति। य: विंशति-वर्षाणि यावत् प्रधानमन्त्रिपदारूढ: आसीत्।

## भीष्म क्यूब-चिकित्सालय:

भारतीय-वायु-सेनया आगरा-नगरे अत्याधुनिक-स्वदैशिक-सुवाह्य चिकित्सालयस्य भीष्म क्यूब इत्यस्य वैमानिकीयपरीक्षणं कृतम्। केन्द्रीय-स्वास्थ्यमन्त्री-मनसुख-माण्डविया: अवदत् यत् नवोन्मेषी एषा प्रौद्योगिकी कस्यामपि आपात्कालिक-स्थितौ चिकित्सकीय-सहायतां उपलब्धयितुं महत्वपूर्ण: उपक्रमो वर्तते। तानि क्यूब इत्याख्यानि जलरोधकाानि दृढानि अल्पभारयुतानि च सन्ति। अवधेयास्पदं वर्तते यत् क्यूबइत्याख्या भीष्म योजना सहयोग-हित-मैत्री-करणाय भारत-स्वास्थ्य-उपक्रम-नामकस्य पदक्रमस्य अभिन्न-अङ्त्वेन-ज्ञायते।

## भारतीयऋतुविज्ञानविभाग:

भारतीयऋतुविज्ञानविभागेन अस्य मासस्य अष्टादश दिनाङ्कपर्यन्तं राजस्थान, उत्तरप्रदेश, पञ्जाब, हरियाणा राज्यानि समेत्य श्वः आरभ्य उत्तरपश्चिमभारतस्य उपरि अधिक-तापस्य पूर्वानुमानं कृतम् अस्ति। अनेनोक्तम् यत् अद्य तटीयमहाराष्ट्रे, गोवायां, श्वः च गुजरात राज्ये उष्ण-आर्द्र-वायुः प्रचलिष्यति। अद्य महाराष्ट्र, मध्यप्रदेश, छत्तीसगढ, ओडिशा, गुजरातप्रदेशेषु च वज्रपातेन, विद्युत्दध्वनिना, तीव्रवायुना च सहैव लघुतः मध्यमवृष्टिः अपि भविष्यति इति ऋतुविभागेन पूर्वानुमानं कृतम् अस्ति।

आई.पी.एल्.

आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायां राजस्थान रॉयल्स- पंजाब-किंग्स-दलयोर्मध्ये अद्य गुवाहाटीनगरे अद्यात्मकं द्वन्द्वं भविष्यति। स्पर्धाया: प्रसारणं सार्ध-सप्तवादनतो समारप्स्यते। सम्प्रति राजस्थानदलं षोडशाङ्कान् गृहीत्वा द्वितीयस्थाने अस्ति। दलमेतत् एकं विजयं सुनिश्चित्य शीर्षेषु चतुर्षु स्थानेषु स्थानप्रापणस्य प्रयासं करिष्यति। ह्य: नवदिल्ल्या: अरूण-जेटली-क्रीडांगणे डेल्ही कैपिटल्सदलं लखनऊ-सुपर-जायन्ट्सदलं नवदश-धावनांकै: पराजितवत्।

।। इति वार्ता: ।।